२७

348sk27

रसपरिचयः

प्रस्तावना

अयि प्रियच्छात्राः! अस्मिन् पाठे रसस्य विषये आलोचना वर्तते। प्रथमपाठात् आरभ्य विविधानां काव्यानाम् अध्ययनं युष्माभिः कृतम् अस्ति। तथैव छन्दोऽलङ्कारादीनामपि परिचयः युष्माभिः प्राप्तः अस्ति। तदनन्तरं रसस्य परिचयः प्राप्तव्यः। साहित्यशास्त्रस्य विषयेषु रसः सर्वप्रधानम् भवति। शब्द-अर्थ-अलङ्कारादयः रसतात्पर्येण एव काव्ये व्यवस्थिताः। अत्र रसविषये विभिन्नानि मतानि सङ्क्षेपेण प्रदर्श्यन्ते। एतस्य अध्ययनेन काव्यप्रकाश-रसगङ्गाधरादीनाम् अध्ययने महत् साहाय्यम् स्यात्। अत्र अत्यन्त- प्रधानस्थलेषु प्राचीनग्रन्थानां श्लोकाः उद्ध्रियन्ते। अन्यथा प्राचीनग्रन्थानाम् तात्पर्यम् एव सरलवाक्यैः प्रतिपाद्यते येन साहित्यशास्त्रेभ्यः इतरशास्त्राणां छात्राणामपि साहित्यशास्त्रविषयस्य बोधः सुष्ठु सम्पद्येत।

उद्देश्यानि

पाठस्यास्याध्ययनेन -

- प्रधानम् विषयः रसः ज्ञास्यते।
- रससूत्रं रसस्य समन्वयम् रसानुभवस्य स्वरूपम् च ज्ञास्यति।
- रसानुभवस्वरूपे काव्यस्य लोकोत्तरत्वम् साधारणीकरणसिद्धान्तञ्च बुध्यात्।
- रसविषये उत्पत्तिवादम् अनुमितिवादम् भुक्तिवादम् अभिव्यक्तिवादञ्चच ज्ञास्यति।
- करुणस्य आनन्दमयत्वसिद्धिः, रसानाम् अनुक्रमः, शान्तरसस्य महिमा च ज्ञातः भवेत्।
- रससिद्धान्तस्य समग्रः परिचयः सिद्ध्यति येन काव्यप्रकाशादिप्रौढग्रन्थेषु अध्ययनगतिः सुगमा भवति।

२७.१) भूमिका

काव्यस्य काव्यशास्त्रस्य च परमं फलम् भवति रसः इति विदुषाम् अभिप्रायः। आनन्दो हि रसस्वरूपम्। सर्वेषाम् प्राणिनाम् सर्वं कार्यम् आनन्दे सुखे वा पर्यवस्यति। तथा काव्यस्य सर्वे विषयाः रसे पर्यवस्यन्ति। रसस्तु स्वस्मिन् पर्यवस्यति, न पुनः स्वपूर्णतार्थम् अन्यत्र प्रवर्तते। एष रसः काव्यात्मा इति प्रतिष्ठितः। दुग्धाद् दधि, दध्नो नवनीतं, नवनीताद् घृतं, घृतात् परं न किमपि भवति। अर्थात् दुग्धादीनाम् अत्यन्तसाररूपि घृतम् भवति। तथैव काव्ये रसः शब्दार्थादीनाम् समेषां सारभूतः अस्ति। रसस्य

प्रकाशनाय कवयः काव्यानि विरचयन्ति। तेषाम् एव अनुभवाय सहृदयाः काव्ये अनुरक्ताः भवन्ति। "नहि रसाद् ऋते कश्चिदर्थः प्रवर्तते" इति भरतमुनिः नाट्यशास्त्रे अवदत्। तेन न केवलं काव्यस्य अपितु गीतनृत्यादीनां सर्वेषां कलाप्रकाराणां रस एव आत्मा साररूप इति अवगन्तव्यम्। रस्यते इति रसः। रस्यते आस्वाद्यते इति अर्थः। तेन आनन्दरूपी स्वादो रस इति अवगम्यते। अस्य रसस्य प्रथमं निरूपणम् उपलभ्यते नाट्यशास्त्रे। तस्य रचयिता भरतमुनिः। नाट्यशास्त्रस्य षष्ठाध्याये रसस्य विषयो विस्तरेण प्रतिपादितः अस्ति। तत्र उक्तं विषयम् आधारीकृत्य ततः परकालीना आलङ्कारिका रसं निरूपितवन्तः। नाट्यशास्त्रस्य प्रसिद्धा प्रामाणिकी व्याख्या भवति अभिनवभारती। तस्या रचयिता अभिनवगुप्तपादः।

२७.२) रससूत्रस्य विवरणम्

"विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" (नाट्यशास्त्रम्- ६) इति भवति रससूत्रम्। तच्च नाट्यशास्त्रे षष्ठाध्याये भवति। काव्येन नाट्येन वा उपस्थापितो रामसीतादिः समुद्रपर्वतमेघादिः वा विभाव इत्युच्यते। स सहृदयेषु रतिशोकादिभावान् अलौकिकरूपेण प्रबोधयति। तस्मात् तस्य विभाव इति नामधेयम्। विभावे विद्यमानाः कटाक्षप्रसार-स्मित-भाषणादि-चेष्टाविशेषः अनुभाव इत्युच्यते। तेन रामसीतादिषु विद्यामाना दर्शनभाषणादिक्रिया अनुभावा इति तात्पर्यम्। व्यभिचारी अर्थात् परिवर्तनशीलः अस्थिर इत्यर्थः। व्यभिचारिभावाः हि एकस्य रसानुभवस्य मध्ये आगच्छन्तः, किञ्चित् क्षणानन्तरं निर्गच्छन्तो मानसिका भावाः। ते च लज्जा-संशय-कुतूहलादयः।

२७.२.१) समन्वयः

काव्येन नाट्येन वा उपस्थापिता भवन्ति रामसीतादय विभावाः। तेषाम् स्मित-दर्शन-संभाषणादिक्रिया वर्ण्यन्ते। तेषाम् लज्जा-हास-संशयादयो व्यभिचारिभावा अपि भवन्ति। एवञ्च रामसीतादयो लज्जा-हास-कुतूहलादियुक्ताः स्मित-दर्शन-भाषणादिक्रियायुक्ताश्च काव्येन नाट्येन वा उपस्थाप्यन्ते इत्यर्थः। एवम् विभावादीनां समुचिते संयोगे जाते सहृदयानां हृदये यः अलौकिक आनन्दः अभिव्यक्तो भवति स रसः।

पाठगतप्रश्नाः-१

१. काव्यस्य आत्मा कः।

२. विभावः कः।

३. रससूत्रम् नाट्यशास्त्रे कस्मिन् अध्याये वर्तते।

४. कस्य प्रकाशनाय कवयः काव्यम् रचयन्ति।

५. रसपदनिर्वचनम् कथम्।

२७.३) रसानुभवस्य स्वरूपम्

रससूत्रे विभावादीनां संयोगे रसो निष्पद्यते इति पश्यामः। तत्र रसात्मना कः तिष्ठति इति विषये जायते जिज्ञासा। तत्र आलङ्कारिका वदन्ति -

"**व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः**" - इति (काव्यप्रकाशः ३/२)

अस्य वचनस्य अयम् अर्थः - विभावानुभावव्यभिचारिभावैः अभिव्यक्तः सहृदयेषु विद्यमानः रतिशोकादिः स्थायी भावः रसो भवति। सहृदयस्य मनसि अनादिवासनारूपेण अनेके भावाः सन्ति। ते च रति-हास-शोकादयः। ते रसत्वप्राप्तिपर्यन्तम् स्थिराः भवन्ति। अतः ते स्थायिभावाः इत्युच्यन्ते। ते च नव भवन्ति।

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च।। (साहित्यदर्पणः. ३/१७५)

अस्मिन् श्लोके एते नव स्थायिभावाः सन्ति - रतिः हासः शोकः क्रोधः उत्साहः भयम् जुगुप्सा विस्मयः शमः इति।

तत्र रतिः हि अभीष्टे विषये मनसः अनुरागजः प्रमोदः। हासो नाम वागादीनाम् विकारात् जातः चित्तस्य विकासः। इष्टनाशादिकारणात् जातः मनसः दुःखविशेषः शोकः। इच्छाभङ्गादिषु प्रतिकूलेषु जातः मनसः तीक्ष्णतागुणः क्रोधः। उत्साहो नाम कार्यारम्भादिषु उत्कटः आवेशः। व्याघ्रादिदर्शनेन अत्यन्तानर्थविषयकम् चित्तस्य दौर्बल्यम् भयम् भवति। दोषादिदुर्विषयदर्शनात् जाता हेयबुद्धिः जुगुप्सा इत्युच्यते। लोकातीतेषु अत्यन्तम् अपूर्वेषु विषयेषु दृष्टेषु आश्चर्यरूपी चित्तविस्फारः विस्मयः। सकलतृष्णानाम् अभावे जातम् स्वात्मविश्रामसुखम् शमः भवति।

एतेषां भावानाम् अनिश्चयात्मकं ज्ञानम् भवति संशयज्ञानम्। यथा स्थाणुर्वा पुरुषो वा इति। अत्र इदं वस्तु स्थाणुः उत पुरुषः इति ग्रहणे अनिश्चयः विद्यते। ईदृशम् ग्रहणं संशयज्ञानम् इत्युच्यते।

लोके जीवनं सुखदुःखात्मकं भवति। तेषाम् एव काव्यमार्गेण अनुभवः लोकोत्तरः भूत्वा परमास्वादरूपी रसो भवति। एतेषां भावानाम् अनुभवः काव्ये कथम् अलौकिको भवति इति संदेहस्य समाधानम् अधुना क्रियते। तत्र प्रथमम्- तेषां लोकजीवने अनुभवः कथं लौकिकः इति प्रदर्श्यते। लोकजीवने सर्वे विषयाः मदीयाः अथवा मदीयाः न भवन्ति इति द्विविधाभ्याम् बुद्धिभ्याम् गृह्यन्ते। तेन लोके सर्वे पदार्थाः स्व-परसम्बन्धानाम् स्वीकारपुरस्सरम् अथवा परिहारपुरस्सरम् गृह्यन्ते इति। एवम् इदं वस्तु मम अस्ति, इदं वस्तु मम नास्ति, इदं वस्तु अन्यस्य अस्ति, इदं वस्तु अन्यस्य नास्ति इत्येवम् ग्रहणानि भवन्ति। अत्र सर्वत्र स्वस्य परस्य वा सम्बन्धस्य स्वीकारः परिहारो वा दृश्यते। इत्थं यत्किञ्चित् वस्तु गृह्यते चेत् तद्वस्तूनाम् ज्ञानम् अनुभवो वा लौकिकः इत्युच्यते। लौकिकः अनुभवः चतुर्विधैः ज्ञानैः भवति इति आलङ्कारिकाः वदन्ति। तानि च सम्यक् ज्ञानम्, मिथ्याज्ञानम्, संशयज्ञानम्, सादृश्यज्ञानम् इति चत्वारि ज्ञानानि। एतानि लोके व्यवहारसाधकानि भवन्ति।

सम्यक् ज्ञानम् - रामोऽयम् वृक्षोऽयम् इत्यादि ज्ञानम् यथार्थज्ञानम् इत्युच्यते। तच्च प्रत्यक्षादि-प्रमाणलब्धम् भवति।

मिथ्याज्ञानम् - मिथ्याज्ञानम् हि भ्रमात्मकं ज्ञानम्। यथा मन्दान्धकारे स्थितां रज्जुम् अदृष्ट्वा तत्स्थाने सर्पः इति प्रतीतिः, स्थाणुं दृष्ट्वा पुरुषः इति प्रतीतिः भवति। ईदृशम् अन्यथाग्रहणम् मिथ्याज्ञानम् इत्युच्यते।

संशयज्ञानम् - विषयस्य अनिश्चयात्मकं ज्ञानम् भवति संशयज्ञानम्। यथा स्थाणुर्वा पुरुषो वा इति। अत्र इदं वस्तु स्थाणुः उत पुरुषः इति ग्रहणे अनिश्चयः विद्यते। ईदृशम् ग्रहणं संशयज्ञानम् इत्युच्यते।

सादृश्यज्ञानम् - पूर्वम् ज्ञातस्य पदार्थस्य सादृश्यबलात् अज्ञाते विषये यादृशं ज्ञानम् भवति तत् सादृश्यज्ञानम्। यथा गौः इव गवयः अस्ति। अत्र गाम् जानन् कश्चित् पुरुषः पूर्वम् अदृष्टम् अपि गवयम् तत्-सादृश्यबलात् अवगच्छति। ईदृशम् ज्ञानम् सादृश्यज्ञानम् इत्युच्यते।

एभिः ज्ञानैः सर्वे व्यवहाराः सम्भवन्ति। किन्तु काव्यपदार्थस्य ग्रहणम् एभिः ज्ञानैः न भवति। चित्रतुरगन्यायेन काव्यस्य ग्रहणम् भवति। चित्रे लिखितः अश्वः न यथार्थरूपी, नापि अश्वभिन्नः, नापि अश्वसदृशः, नापि अश्वो वा तद्भिन्नो वा इति प्रतीयमानः। किन्तु अश्वोऽयम् इत्येव ज्ञायते। ईदृशं ज्ञानम् आहार्यज्ञानम् इति वदन्ति। यत्किञ्चित् प्रयोजनवशात् औचित्येन अतस्मिन् तद्बुद्धिः आहार्यज्ञानम् भवति। तच्च ज्ञानम् विवेकपूर्वकं भवति न तु रज्जुसर्पज्ञानवत्। रज्जौ सर्पज्ञानं यत् भवति तत् यथार्थस्य ग्रहणम् नास्ति। आहार्यज्ञाने तु यथार्थज्ञाने सत्यपि अन्य-प्रयोजनसिद्धये अनिदम् इदम् इति गृह्यते विवेकपूर्वकम् एव। यथा एकस्मिन् वने एकः सिंहः आसीत्। स वनराजो भवितुम् इच्छति स्म। तदर्थं प्राणिनाम् विश्वासलाभाय सभाम् आयोजितवान् इत्येवमादिः कथा प्रवर्तते। तत्र सिंहः वनराजत्वम् न इष्टवान्, प्राणिनाम् सभामपि न आयोजितवान्, यतः सिंहः कश्चित् प्राणी न तु विवेकी मनुष्यः। मनुष्यः चेत् तत्सर्वं कुर्यात्, न कदाचिदपि मृगः करोति इत्येवम् यथार्थः अस्माभिः ज्ञायते। तथापि सिंहस्य तादृशाः व्यवहाराः अङ्गीक्रियन्ते। अङ्गीकारश्च आहार्यज्ञानबलादेव। एवंविधेन ईदृशेन आहार्यज्ञानेन एव पञ्चतन्त्रादि-कथादिषु विस्तरेषु नीतिबोधः सिद्ध्यति। एवञ्च काव्यपदार्थाः विभावादयः वा आहार्यज्ञानेन विषयीक्रियन्ते इति तात्पर्यम्। तथा गृहीता विभावादयः साधारणा भवन्ति। साधारणीकरणेन विभावादीनाम् अलौकिकत्वम् सिद्धम् भवति।

२७.४) साधारणीकरणम् -

विभावादीनाम् विषये स्वस्य विषये च सहृदयस्य देशकालादिसम्बन्धानाम् स्वकीयपरकीयत्वरूपाणाम् सम्बन्धानाम् स्वीकारस्य परिहारस्य अभावः साधारणीकरणम् भवति। अतः साधारणाः विभावादयः नाम एते मम, एते मम न भवन्ति, एते परस्य, एते न परस्य भवन्ति इत्येवंविधम् स्वसम्बन्धम् परसम्बन्धं च विना एव ज्ञायन्ते इत्यर्थः। देश-काल-स्वकीयपरकीयत्वादयः सम्बन्धाः लोके पदार्थानाम् आवरणरूपेण तिष्ठन्ति। तादृशं आवरणं यदा न दृश्यते तदा पदार्थः साधारणः भवति। सम्बन्धावरणम् भवति चेत् असाधारणम् एव भवति। असाधारणो नाम विशेषरूपी परिमितः इत्यर्थः।

लोके प्रायः सर्वे पदार्थाः असाधारणाः एव प्रतीयन्ते। तस्मात् एकेन पुरुषेण सम्बद्धः पदार्थः अन्येन अनुभवितुम् आस्वादयितुं वा न शक्यते। न खलु एकस्य भार्या अन्येन द्रष्टुमपि युक्ता। एवं सर्वे पदार्थाः सम्बन्धावरणेन सहिताः विशेषाः च भवन्ति।

काव्ये तु विभावादयः विशेषधर्मं विना एव प्रतीयन्ते अर्थात् साधारणाः एव प्रकाशन्ते। अतः कस्यचिदपि सम्बन्धः तेषां न भवति। सम्बन्धरूपम् आवरणम् भग्नम् भवति। अत एव काव्ये सर्वे विभावादयः पति-पत्नी-पुत्रादिरूपाः सर्वैः द्रष्टुम् आस्वादयितुं च शक्याः। श्रीकृष्णराधिकादीनाम् चुम्बनालिङ्गनादिकम् अपि सर्वेषाम् अवलोकनयोग्यम् भवति। न कदाचिदपि जीवने एवं भवति। तथा विभावादीनाम् साधारणतया प्रतीतिः अलौकिकप्रतीतिः इति आलङ्कारिका वदन्ति। विभावादीनाम् विषये आहार्यज्ञानम्, ततः साधारणीकरणञ्च सहृदयत्वमहिम्ना सिध्यति। विभावादयः यदा साधारणतया प्रतीयन्ते तदा सहृदयाणाम् हृदयम् विभावादिषु तन्मयम् भवति। तदा चित्ते सत्त्वगुणः व्याप्तो भवति। रजोगुणः तमोगुणश्च अधो गच्छतः। ततः चित्तमलरूपम् अज्ञानम् तत्कालम् निवर्तते। शुद्धसत्त्वमात्रम् प्रकाशते। अज्ञानमेव आत्मनः स्वरूपानन्दानुभवे प्रतिबन्धकं भवति। अज्ञानम् अत्र मुख्यतया अन्यथाज्ञानमेव। तच्च अहम् मनुष्यः कर्ता, सन्ति मम नैकानि कर्तव्यानि, ततश्च सन्ति भोक्तव्यानि फलानि इत्यादिरूपम् भवति। तेन आनन्दात्मकम् आत्मनः मूलरूपम् आच्छादितम् अस्ति। अतः संसारः आरब्धः अस्ति। ईदृशम् अज्ञानं लौकिकसम्बन्धानाम् ग्रहणेन तिष्ठति, साधारणीकरणे जाते तु तत् अज्ञानम् तात्कालिकनिवृत्तिम् प्राप्नोति। यथा विभाविदीनां विषये साधारणीकरणम् भवति तथा सहृदयस्य स्वविषये अपि साधारणीकरणम् भवति तदा अज्ञानस्य तात्कालिकनिवृत्तिः भवति। तदा पूर्वमेव विभावादिभिः प्रबोधितः साधारणीकृतश्च रत्यादिः स्थायी भावः चिदानन्दोपहितः रसः इत्यभिधीयते। एवम् विभावादिभिः प्रबोधितः सहृदयत्वमहिम्ना साधारणीकृतः रत्यादिः स्थायी भावः रसः इति अभिनवगुप्त-मम्मटादीनाम् मतम्।

जगन्नाथमते तु सहृदयत्वमहिम्ना विभावादयः साधारणा भवन्ति। तैः प्रबोधितो रत्यादिः स्थायी भावोऽपि साधारणः भवति। तदा साधारणीकृतेन चित्तवृत्त्यात्मना स्थायिभावेन उपहितः आत्मापि साधारणः सम्पद्यते। अतः लौकिककर्तृत्वादिसम्बन्धावरणम् विना एव व्यवतिष्ठते। एवम् स्वरूपप्रतिबन्धकनिवृत्त्या आत्मा रत्यादि-स्थायिभावेन उपहितं चिदानन्दलक्षणम् आत्मानम् आत्मना संवेत्ति। तेन साधारणीकृतेन रत्यादिना संवलितः अज्ञानावरणरहितः आत्मैव रसः इति स्थितम्। वेदेऽपि आम्नातम् "रसो वै सः, “रसं ह्येवायं लब्ध्वा आनन्दी भवति" इति। (तैत उप.ब्रह्म.वल्ली) रसः एव आत्मा। सः रसम् अर्थात् आत्मानम् लब्ध्वा आनन्दी भवति इति अस्य मन्त्रस्य अर्थः।

पाठगतप्रश्नाः-२

६. रसः कः।

७. कति स्थायिभावाः सन्ति।

८. आहार्यज्ञानम् किम्।

९. अज्ञानम् किम्।

१०. व्यभिचारिभावः कः।

२७.५) रससूत्रविवरणे मतभेदाः

रससूत्रस्य विवरणे चत्वारः वादाः प्रसिद्धाः सन्ति। ते अभिनवभारत्याम् उपलभ्यन्ते। रस उत्पद्यते इति भट्टलोल्लटः। रसः अनुमीयते इति श्रीशङ्कुकः। रसो भुज्यते इति भट्टनायकः। रसः अभिव्यज्यते इति अभिनवगुप्तः। अधुना एतानि मतानि सङ्क्षेपेण अवलोक्यन्ते।

उत्पत्तिवादः -

विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः इति भरतमुनिकृतं रससूत्रम् भवति। अत्र निष्पत्तिः इति पदस्य उत्पत्तिः इति अर्थं प्रतिपादयति भट्टलोल्लटः। अस्य मते विभावादीनां स्थायिभावानां रसस्य च मध्ये उत्पाद्य-उत्पादकभावः सम्बन्धः। अस्य मते रसः अनुकार्ये भवति। नटेन अभिनयद्वारा यस्य अनुकरणम् क्रियते सः अनुकार्यः। यथा रामः कृष्णः इत्यादयः अनुकार्याः। अनुकार्ये स्थितो रसो नटे रामत्वाद्यनुसन्धानबलात् प्रतीयते। तेन मुख्यतया अनुकार्येषु रामादिषु रसो भवति। गौणतया च स रसो नटेषु भवति इति भट्टलोल्लटमतम्।

अनुमितिवादः -

अनुमितिवादम् प्रतिपादितवान् श्रीशङ्कुकः। एष भट्टलोल्लटमते दोषम् आविष्करोति। रसः अनुकार्ये रामादौ यदि अङ्गीक्रियेत तर्हि ते रामादयः अधुना न सन्ति, यदि स्युः, अथापि न स रङ्गमञ्चे तिष्ठति। तस्मात् अनुकार्ये रसो न युक्तः। अतो रसः अनुमीयते इति अङ्गीकरणीयम्। लोके पर्वते दृश्यमानम् धूमम् दृष्ट्वा तत्र पर्वते वह्निः भवति इति निश्चयः क्रियते। अर्थात् समुचितकारणम् पुरस्कृत्य वह्नेः अनुमानम् क्रियते इत्यर्थः। एवं रामसीतादीनाम् अनुकर्तृषु नटेषु चुम्बनालिङ्गनादीन् अभिनयरूपान् चेष्टाविशेषान् दृष्ट्वा तत्तत् चेष्टानुगुणम् रसं नटेषु अनुमिन्वन्ति सामाजिकाः। अत्र नटे रसम् अनुमाय सहृदयाः स्वस्मिन् आनन्दम् अनुभवन्ति। इत्थम् श्रीशङ्कुकमते रसः अनुमानेन उपलभ्यते इति स्थितम्। तस्मात् रससूत्रे निष्पत्तिपदस्य अनुमितिः इत्यर्थः सिध्यति तन्मते।

भुक्तिवादः-

भुक्तिवादं भट्टनायकः प्रतिष्ठापितवान्। एष प्रथमम् श्रीशङ्कुकमते दोषम् आविष्करोति। नटेषु रसो यदि अङ्गीक्रियेत तर्हि काव्यादिषु सहृदयानाम् आनन्दः कथम् भवितुम् अर्हति। काव्यादिषु आनन्दः यदि सहृदयस्य न भवति तर्हि सहृदयः काव्यादिषु किमर्थम् प्रवर्तेत। नटेषु अनुमितो रसो लौकिक एव भवति। तस्य साधारणीकरणम् नास्ति इति कारणात् शृङ्गारादिरसप्रधानम् काव्यम् सभ्यानां जुगुप्साकरम् भवेत्। अनुमानपक्षे तु हेतुः व्यभिचरितो भवति इति अन्योऽपि दोषः श्रीशङ्कुकमते तिष्ठति। तस्माद् भट्टनायको भुक्तिवादम् प्रतिपादयति। तन्मतं यत् काव्ये अभिधया काव्यार्थबोधः सम्पद्यते इति। तदनन्तरम् काव्यस्य भावकत्वव्यापारेण विभावादीनां साधारणीकरणम् भवति। ततः सहृदयस्य सत्त्वोद्रेको भवति यो

रसानुभवयोग्यताम् मनसि निष्पादयति। तदा चित्तविक्षेपकारकौ रजस्तमोगुणौ न तिष्ठतः। ततः परं चिदानन्दरूपी आत्मा स्वस्मिन् विश्रान्तो भवति। सा च विश्रान्तिः रत्यादिस्थायिभावसहिता भूत्वा भोगीकरणव्यापारेण भुज्यते। तस्मात् अस्मिन् मते निष्पत्तिः इत्यस्य भुक्तिः इत्यर्थः।

भट्टनायकमते दोषाः -

विभावादीनां साधारणीकरणार्थं काव्यशब्दानामेव भावकत्वव्यापारः अङ्गीकृतः। स च अयुक्तः। भावकत्वं च सहृदयहृदयधर्मो भवति, न तु शब्दधर्मः।

आत्मविश्रान्तिरूपं रसम् आस्वादयितुम् भोजकत्वव्यापारः तेन अङ्गीकृतः। स च न आवश्यकः। यतो हि घटेन आच्छादितं दीपं द्रष्टुं घटस्य अपसारणमात्रं कर्तव्यम् अस्ति। घटापसारणे कृते ज्वलन् दीपः स्वयमेव प्रकाशते। घटापसारणात् परं दीपप्रदर्शनम् इति अपरो व्यापारः अवशिष्टो न भवति। तथा आत्मनः चैतन्यरूपिणः आनन्दस्य अनुभवे प्रतिबन्धकनिवारणम् यदा भवति तदा स्वप्रकाशस्य आत्मनो विश्रान्तिसुखम् आत्मना एव अनुभूयते।

भट्टनायकमते गुणाः -

रसः सहृदयनिष्ठ इति तस्य मतम् अतीव समञ्जसम्। रसप्रक्रियायाम् प्रधानम् कीलकस्थानम् विभावादीनाम् साधारणीकरणम्। तस्य निरूपणे भट्टनायकस्य सुमहद् योगदानम् भवति।

अभिव्यक्तिवादः-

अभिव्यक्तिवादम् प्रतिष्ठापितवान् अभिनवगुप्तपादः। आनन्दवर्धनस्य मतम् आसीत् यत् काव्यरसयोर्मध्ये व्यङ्ग्य-व्यञ्जकभाव इति। तस्य सुष्ठु प्रतिष्ठाम् कृतवान् अभिनवगुप्तपादः। अस्य मते रसो निष्पद्यते इत्यस्यार्थो हि रसः अभिव्यज्यत इति। काव्येन नाट्येन वा विभावादीनाम् उपस्थापनम् भवति। सहृदयत्वमहिम्ना विभावादीनां साधारणीकरणम् भवति। साधारणीकृतैः विभावादिभिः सहृदयस्य रत्यादिस्थायिभावानां साधारणीकरणपूर्वकमेव प्रबोधनम् भवति। साधारणीकृते स्थायिभावे प्रमाता अपि साधारणो भवति, अर्थात् अज्ञानस्य तात्कालिकनिवृत्तिः भवति। अज्ञानञ्च अत्र लौकिकसम्बन्धरूपम् अहम् कर्ता, मम एते, मम न एते, इदम् अन्येषाम् इत्यादिलक्षणम् भवति। येन प्रमाता असाधारणः परिमितश्च भवति। तस्य तात्कालिकनिवृत्तौ सम्बन्धावरणरहितो रत्यादिस्थायिभावः आत्मस्वरूपेण चिदानन्देन विषयीकृतो भवति। एवं साधारणीकृतः अत एव चिदानन्दविषयीकृतः स्थायिभावः अभिव्यक्तः इत्युच्यते। स च आनन्दरूपी रसो भवति।

एतेन अभिव्यक्तिवादेन रससिद्धान्तः प्रतिष्ठितः। जगन्नाथः अस्य चरमपरिष्कारम् कृतवान्। अभिनवगुप्त-मम्मटादीनाम् मते चिदानन्दसंवलितः अज्ञानावरणरहितः स्थायी भावो रसो भवति। जगन्नाथमते तु रत्यादिस्थायिभावसहितः किन्तु अज्ञानावरणरहित आत्मा एव रसो भवति। अन्याः प्रक्रियाः जगन्नाथमते अभिनवगुप्तादीनाम् मते च समाना भवन्ति।

पाठगतप्रश्नाः-३

११. रसः अनुकार्ये अस्ति इति कः अवदत्।

१२. अनुकर्तरि रसः अस्ति इति कस्य मतम्।

१३. भोगीकरणव्यापारः कुतः स्वीकृत्ः।

१४. साधारणीकरणम् प्रथमतया केन निरूपितम्।

१५. अभिव्यक्तिवादस्य प्रतिष्ठा केन कृता।

१६. आनन्दवर्धनमते रसः कीदृशः।

१७. अभिनवगुप्तमते भोगीकरणम् कुतः नास्ति।

१८. अभिनवगुप्तमते साधारणीकरणम् कथम् सिद्ध्यति।

२७.६) करुणरसविषये आक्षेपः समाधानञ्च

शोकस्थायिभावात्मको भवति करुणरसः। शोकः तस्य स्थायिभावः चेत् अयम् आनन्दमयो न भवेत्। अतो रस्यते आस्वाद्यते इति रस इति रसपदव्यवहारः करुणे युक्तो न भवति इति आक्षेपः। तस्य समाधानम् एवं विद्यते - करुण आनन्दरूपी इत्यत्र सहृदयानाम् अनुभवः प्रमाणम्। यदि करुणरसो दुःखरूपी तर्हि करुणरसात्मके काव्ये कोऽपि न प्रवर्तेत। करुणप्रधानं रामायणादिकाव्यं लोके दुःखहेतुः स्यात्। किन्तु तेषु काव्येषु लोकस्य इच्छापूर्वक-प्रवृत्तिः दृश्यते। अतः करुण आनन्दरूपी एव। रसप्रक्रियायाम् अङ्गीकृतेन साधारणीकरणेन करुणो दुःखरूपी इति न सिद्ध्यति।

२७.७) रसानाम् क्रमः

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा पुनः।। (सा.द.३.७६)

अत्र रसानां क्रमो विद्यते। भरतमुनिः अपि इममेव क्रमम् अनुसृतवान्। शृङ्गारः हास्यः करुणः रौद्रः वीरः भयानकः बीभत्सः अद्भूतः शान्तः इति नव रसाः क्रमशो विद्यन्ते। एतस्य क्रमस्य महत्त्वं वर्णयति अभिनवगुप्तः अभिनवभारत्याम्।

तत्र रतिः सकलप्राणिनाम् स्वाभाविकी बलवती प्रिया च भवति। तस्माद् रतिस्थायिभावकः शृङ्गारः प्रथमः। स कामप्रधानः। हास्यः सर्वदा शृङ्गारानुगामी। तस्मात् स द्वितीयः। सुखस्य विरोधी शोकः। तस्मात् शोकस्थायिभावः करुणः तृतीयः। करुणस्य निमित्तभूतः क्रोधः। तस्मात् क्रोधस्थायिभावात्मको रौद्ररसः चतुर्थः। रौद्रः अर्थप्रधानः अर्थात् जीवनस्य साधनभूतानाम् द्रव्याणाम् कारणाद् जायते। जीवनसाधनभूतं सर्वं द्रव्यम् अर्थ इत्युच्यते। तस्य अर्थपुरुषार्थः इति नाम। कामस्य अर्थस्य च मूलं धर्मः। तस्माद् धर्मप्रधानो वीररसः पञ्चमः। उत्साहस्थायिभावात्मकः स भीतानाम्

अभयप्रदानपरः। अतो वीरानन्तरम् भयानकः। भयानकरसस्य विभावादीनां साधारण्यम् बीभत्सस्य भवति। तस्माद् भयानकानन्तरम् बीभत्सः। वीररसस्य अन्तिमपरिणामो विस्मयः। तस्माद् अन्ते विस्मयस्थायिभावः अद्भुतरसः। एवम् अष्टौ रसा धर्मार्थकामरूपस्य त्रिवर्गस्य प्रतिनिधित्वेन व्यवस्थापिताः। त्रिवर्गस्तु प्रवृत्तिधर्मेण सिद्धो भवति। तद्विरुद्धो निवृत्तिधर्मः। तेन अपवर्गः अर्थाद् मोक्षः सिद्ध्यति। तस्मात् सर्वान्ते मोक्षफलकः शान्तः पठितः।

२७.८) शान्तरसस्य महत्त्वम्

अलङ्कारशास्त्रे शान्तरसस्य परमोच्चं स्थानं वर्तते। शान्तरसविषये भरतमुनिः एवम् अवदत् - **अथ शान्तो नाम शमस्थायीभावात्मको मोक्षप्रवर्तकः। स तत्त्वज्ञान-वैराग्य-आशयशुद्ध्यादिभिः भावैः समुत्पद्यते** इति। अस्य अयम् अर्थः - शमस्थायिभावेन शान्तरसः परिपक्वो भवति। शमभावः आत्मानात्मविवेकरूपेण तत्त्वज्ञानेन वैराग्येण च सिद्ध्यति। शमो नाम शान्तिः उपशमः अर्थात् संसारे यत्किञ्चित् पदार्थद्वारा प्राप्तव्यात् सुखात् दुःखात् वा मनसि क्षोभो यदि न भवति स शमभावः। संसारस्य आत्मनश्च यथार्थबोधः तत्त्वज्ञानम् इत्युच्यते। तत्त्वज्ञानेन दुःखात्मके अनित्ये संसारे औदासिन्यम् भवति। तत्त्वज्ञानसिद्धेन वैराग्येण संसारे प्राप्तुम् इष्टं कर्तव्यं वा न तिष्ठति। ईदृशं वैराग्यम् अवलम्ब्य आत्मज्ञानरूपम् ब्रह्मानन्दम् आत्मनि प्राप्तुम् अर्हति। शमस्थायिभावात्मकः शान्तरसो नित्यानित्यविवेक-वैराग्य-ध्यान-ब्रह्मचिन्तनादि-भावैः सिद्धं मोक्षम् प्रति प्रेरणाम् जनयति। तस्मात् शुक-शङ्कराचार्यादीनां जीवनचरितम् मुमुक्षवः अपि आस्वादयन्ति। आत्मनि यथा सर्वे लोका लीयन्ते तथा सर्वे भावा अर्थात् रसाः शान्ते लीयन्ते। तदुक्तवान् भरतमुनिः-

स्वं स्वं निमित्तमासाद्य शान्ताद् भावः प्रवर्तते।
पुनर्निमित्तापाये तु शान्त एव प्रलीयते।।

सरलार्थः - रति-हास-शोकादि-निमित्तानि आश्रित्य शृङ्गार-हास्य-करुणादि-रसाः अभिव्यज्यन्ते। पुनः रतिहासादिनिमित्तानाम् अभावे ते शान्ते एव लीयन्त इति। तस्मात् स एव वदति -

भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः।

सरलार्थः - शृङ्गारादयः अष्टौ रसाः शान्ताद् उत्पद्यन्ते यथा आत्मनो जगद्भावा उत्पद्यन्ते। शान्तो न उत्पद्यते इत्यतः स प्रकृतिः इत्युच्यते यथा वेदान्तिनाम् परमात्मा।

रसतालिका

रसः	स्थायिभावः	व्यभिचारिभावाः	वर्णः	देवता
शृङ्गारः	रतिः	लज्जा-हास-चिन्ता-कुतूहलप्रभृतयः	श्यामः	विष्णुः
हास्यः	हासः	निद्रा-आलस्यादयः	श्वेतः	प्रमथगणः
करुणः	शोकः	मोह-विषाद-ग्लानि-स्मृतिप्रभृतयः	कपोतवर्णः	यमः
रौद्रः	क्रोधः	मद-अमर्ष-मोहप्रभृतयः	रक्तवर्णः	रुद्रः

वीरः	उत्साहः	धृति-मति-गर्व-स्मृतिप्रभृतयः	हेमवर्णः गौरो वा	इन्द्रः
भयानकः	भयम्	भ्रान्ति-शङ्का-अवस्मारप्रभृतयः	कृष्णवर्णः	कालः
बीभत्सः	जुगुप्सा	मोह-आवेग-अवस्मार-व्याधिप्रभृतयः	नीलवर्णः	महाकालः
अद्भुतः	विस्मयः	वितर्क-भ्रान्ति-आवेग-हर्षादयः	पीतवर्णः	ब्रह्मा
शान्तः	शमः	निर्वेद-धृति-मति-दयादयः	अतिधवलवर्णः	नारायणः

पाठगतप्रश्नाः-४

१९. हास्यः कम् अनुगच्छति।

२०. धर्मप्रधानः रसः कः।

२१. करुणात्परम् रौद्ररसः कुतः।

२२. मोक्षप्रवर्तकः रसः कः।

२३. शान्तस्य स्थायीभावः कः।

२४. विकृतिरसाः कति।

२५. शान्तः कुतः प्रकृतिरसः।

२६. भावाः कदा शान्ते विलीयन्ते।

किम् अवगतम्

काव्यस्य काव्यशास्त्रस्य च परमोच्चः विषयः भवति रसः। रसस्य अनुभवेन कवयः काव्यम् रचयन्ति। तेन काव्येन रसमेव अनुभवन्ति सहृदयाः। काव्यस्य शब्द-अर्थ-अलङ्कारादयः सर्वे अंशाः रसे परिसमाप्यन्ते। रसः स्वस्मिन् परिसमाप्तः। स काव्यात्मा। तस्य निष्पत्तिम् भरतमुनिः निरूपितवान्। विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः इति भरतकृतं रससूत्रम्। काव्येन नाट्येन वा समर्पिता विभावादयः सहृदयत्वबलात् साधारणा भवन्ति। साधारणीकरणात् ते काव्यपदार्था लोकोत्तरा भवन्ति। एवं साधारणा अलौकिकाः च सन्तो विभावादयः सहृदयानां रत्यादिस्थायिभावान् उद्बोधयन्ति। तदा रत्यादिस्थायिभावः अपि साधारणः सन् जागरितो भवति। साधारणीकरणबलात् लौकिकसम्बन्धाः तत्र न प्रतीयन्ते। ततःपरम् आत्मानन्दस्य प्रतिबन्धकम् अज्ञानम् तात्कालिकनिवृत्तिम् प्राप्नोति। तदा प्रतिबन्धकाभावात् स्वयंप्रकाशशीलेन आनन्दरूपिणा आत्मना विभावादिभिः अभिव्यक्तः स्थायी भावः प्रकाशितो भवति। साक्षाद् आत्मना प्रकाशो भवति, अतः स्थायी भाव आनन्दमयो भवति। एवं

रसपरिचयः

विभावादिभिः अभिव्यक्तो रत्यादिस्थायिभावो रस इति अभिनवगुप्तमम्मटादीनाम् अभिप्रायः। जगन्नाथस्तु रत्यादिस्थायिभावयुक्त आवरणरहित आत्मा एव रस इति वदति। तत्र प्रमाणश्रुतिः भवति - रसो वै सः, रसं ह्येवायं लब्ध्वा आनन्दी भवति। इति।

रसव्याख्याने चत्वारो वादाः प्रसिद्धाः। ते च क्रमेण उत्पत्तिवादः, अनुमितिवादः, भुक्तिवादः, अभिव्यक्तिवादः चेति। तेषां वादानां वक्तारः क्रमेण भट्टलोल्लटः, श्रीशङ्कुकः, भट्टनायकः, अभिनवगुप्तपादः चेते भवन्ति। स्थायिभावाः नव सन्ति। तेन रसा अपि नव भवन्ति। तेषु शृङ्गारतः अद्भुतपर्यन्तम् अष्टौ रसा धर्मार्थकामानां प्रतिनिधिरूपा भवन्ति। शान्तो मोक्षप्रतिनिधिर्भवतीति शम्।

पाठान्तप्रश्नाः

१. रससूत्रम् व्याख्यात।
२. साधारणीकरणम् निरूपयत।
३. काव्यपदार्थस्य लोकोत्तरत्वम् कथम् सिद्ध्यति।
४. भट्टनायकमते गुणदोषयोः आलोचनम् कुरुत।
५. अभिव्यक्तिवादम् विषदयत।
६. करुणस्य आनन्दमयत्वम् उपपादयत।
७. शान्तरसस्य महत्वम् प्रतिपादयत।
८. उत्पत्तिवादे अनुमितिवादे च के दोषाः सन्ति।

पाठगतप्रश्नानामुत्तराणि

१. रसः
२. येन रत्यादिस्थयीभावः प्रबोध्यते सः विभावः
३. षष्ठाध्याये
४. रसस्य प्रकाशनाय
५. रस्यते आस्वाद्यते इति रसः
६. विभावादिभिः अभिव्यक्तः रत्यादिः स्थायीभावो रसः।
७. नव।
८. यत्किञ्चित्प्रयोजनवशात् विवेकपूर्विका अतस्मिन् तद्बुद्धिः।
९. अहम् कर्ता मम कर्तव्यानि सन्ति इत्यादि अन्यथाग्रहणम् अज्ञानम् इत्युच्यते।
१०. व्यभिचरणशीलः अर्थात् अस्थिरस्वभावः व्यभिचारिभावः।
११. भट्टलोल्लटः।
१२. श्रीशङ्कुकस्य।
१३. रसानुभवार्थम्।
१४. भट्टनायकेन।
१५. अभिनवगुप्तेन।

१६. रसः अभिव्यङ्ग्यः।

१७. रसः स्वप्रकाशः इति कारणात्।

१८. सहृदयत्वमहिम्ना।

१९. शृङ्गारम् अनुगच्छति।

२०. वीररसः।

२१. शोकनिमित्तः क्रोधः।

२२. शान्तः।

२३. शमः।

२४. अष्टौ।

२५. सर्वेरसाः शान्ते लीयन्ते।

२६. निमित्ते नष्टे शान्ते विलीयन्ते।

अवलोकनीयाः ग्रन्थाः

- साहित्यदर्पणम् - तृतीयाध्यायः
- काव्यप्रकाशः - तृतीयाध्यायः
- रसगङ्गाधरः - प्रथमाननम्
- अभिनवभारती - षष्ठ्याध्यायः

॥ इति सप्तविंशः पाठः ॥

राष्ट्रियमुक्तविद्यालयीशिक्षासंस्थानम्

उच्चतरमाध्यमिककक्षायाः पाठ्यक्रमः

संस्कृतसाहित्यम् (३४८)

औचित्यम्

संस्कृते काव्यसम्पत्तिः सागरवत् अपारा अमूल्या च वर्तते। तत्र अस्माकं सनातनज्ञानराशिः तदात्मकं जीवनं च प्रतिबिम्बितं वर्तते। कवीनां काव्यानाम् अलङ्कारशास्त्रस्य च अध्ययने छात्रस्य भूमिका अपेक्षिता। काव्यराशेः मूलं स्वरूपं वेदे एव दृश्यते। साहित्यस्य प्रवेशार्थं वेदादिवाङ्मयस्य परिचयः आवश्यकः अस्ति। अपि च वेदेन उपदिष्टं तत्त्वमेव काव्येन प्रकटीक्रियते। वेदस्तु षडङ्गसहितः अस्ति। अतः वेदस्य षडङ्गानाञ्च परिचयः अपि आवश्यकः। वेदकाव्ययोः मध्यवर्ति पुराणसाहित्यम्। तस्मात् पुराणस्यापि सामान्यपरिचयः आवश्यकः। स च अत्र अस्ति। एवं वेदस्य पुराणस्य च परिचयं प्राप्य काव्यस्य प्रवेशः भवति।

संस्कृतिर्नाम सुपरिष्कृता जीवनपद्धतिः यया क्रमशः आत्मोद्धारः सिद्ध्यति। भारतीयसनातनसंस्कृतिः चतुर्भिः पुरुषार्थैः परिकल्पिता वर्तते। धर्मः अर्थः कामः मोक्षः इति चत्वारः पुरुषार्थाः। कामो नाम लौकिकजीवनसन्तृप्तिः सुखं वा। अर्थो नाम तादृशसुखलाभार्थम् अपेक्षितानि वस्त्र-आहार-धन-क्षेत्रादीनि जीवनसाधनानि। धर्मो नाम अर्थानामर्जने तद्वारा सुखलाभे शास्त्रोक्तः नियमविशेषः। मोक्षः अनन्तः शाश्वतानन्दः। एतेषां विवेके वेदः परमं प्रमाणम्।

कवेः कर्म काव्यम् इति आलङ्कारिका वदन्ति। तच्च रमणीयं शब्दार्थयुगलम्, रसात्मकं वाक्यम् इत्यपि अन्यान्यविद्वांसः वदन्ति। अस्मत्परम्परायां जीवनविवेकाय शास्त्रमार्गः इव काव्यमार्गोऽपि अतीव आदृतो वर्तते।

वेदः प्रभुसम्मितः इत्युच्यते। पुराणं मित्रसम्मितम् उत्युच्यते। काव्यं हि कान्तासम्मितं भवति। कान्तासम्मितं नाम कान्तासदृशम् इत्यर्थः। कान्ता नाम प्रिया भार्या इत्यर्थः। (यदा) लोके साध्वीं कुशलां च कान्तां किमपि जिज्ञासमानः पृच्छति। तदा सा साक्षात् अभिप्रायवाचकं वाक्यं परित्यजति। ततः स्मित-कटाक्ष-मुखावनमनादिचेष्टाविशेषपुरःसरं परोक्षतः स्वाभिप्रायसूचकैः वचनैः अभिमतार्थं ज्ञापयन्ती तत्र कान्तं प्रवर्तयति। यथा किम् आम्रफलम् आस्वादयसि उत द्राक्षाफलम् इति कान्तः कान्तां पृच्छति। तदा आम्रफलमास्वादयामि इति साक्षात् न वदति। आम्रफलं मधुरं परिमलयुक्तं विविधवर्णरञ्जितं भवति इति वदति। तेन एतदेव उक्तं भवति यत् अहम् आम्रफलम् आस्वादयितुमिच्छामि इति। एवं कान्तानां यथा परोक्षतः स्वाभिप्रायाभिव्यञ्जनशैली वचने भवति तथा काव्यस्यापि भवति। अतः काव्यं कान्तासम्मितम् इति प्रसिद्धम्। कान्तावचनं यथा सरसं मनोहरं भवति तथा काव्यमपि सरसरमणीयं भवति येन सहृदयहृदयम् आकृष्टं भवति। एतस्मात् कारणात् वेदात् पुराणात् च विलक्षणं भवति।

ईदृशनां काव्यानाम्, कवीनाम्, काव्यशास्त्रस्य च परिचयः छात्राणाम् भवतु इति धिया संस्कृतसाहित्यम् नाम पत्रं पाठ्यत्वेन योज्यते। (Communications Skill) भावविनिमयकौशलम् पुरा अद्यापि च गुरुत्वम् आवहति। स्वाभिप्रायः कथं साक्षात् परोक्षतः वा प्रकटयितुं शक्यः इति काव्यात् ज्ञायते। इत्थं काव्याध्ययनस्य बहूनि प्रयोजनानि सन्तीति औचित्यम् आवहति यद् सर्वश्रेष्ठानां कवीनाम् काव्यानि पठनीयानि इति।

अधिकारी

अयं पाठ्यविषयः सम्पूर्णरूपेण संस्कृतभाषया लिखितः अस्ति। परीक्षा अपि संस्कृतमाध्यमेन एव भविष्यति। अतः अस्य पाठस्य कः अधिकारी इति नूनम् समुदेति प्रश्नः।

अत्र स छात्रः अधिकृतः यः -

- अधीतव्याकरणकोषः काव्यरसपिपासुः।
- सरलसंस्कृतं, संस्कृतसाहित्यास्य सरलगद्यांशान् पद्यांशान् च पठितुम् बोद्धुं च शक्नोति।
- सरलसंस्कृतं बोद्धुं शक्नोति।
- स्वभावं संस्कृतभाषया लिखित्वा प्रकटयितुं शक्नोति।

प्रयोजनम् (सामान्यम्)

उच्चतरमाध्यमिकस्तरे संस्कृतसाहित्यस्य पाठ्यत्वेन योजनस्य कानिचन उद्देशानि अत्राधो दीयन्ते।

- जीवनस्य चरमलक्ष्यं सुखलाभः। इह परत्र च। काव्याध्ययनेन तत् सिद्ध्यति। अतः अध्येतॄणां सिध्यतु।
- बहूनि काव्यानि सुखप्रतिपादनाय प्रवृत्तानि सफलानि विफलानि च भवन्ति। तत्र वैफल्यस्य कारणानि कानि इति ज्ञात्वा छात्रः काव्यस्य सूक्ष्मं चिन्तनं कर्तुम् प्रभवेत्।
- कविः यथा स्वस्य विचित्राभिः उक्तिभिः जनान् रञ्जयति तथा काव्याध्ययनेन छात्रोऽपि सामर्थ्यम् अर्जयेत्। अन्यकृतस्य काव्यस्य च आदरं कुर्यात्।
- स्वस्य स्वपरिचितानां च जीवनं काव्यरसेन परिपूर्णं कर्तुं प्रवर्तते।
- संस्कृतकाव्यानां महिमानम् अवगम्य तत्प्रचारे बद्धादरः सश्रद्धं प्रवर्तताम्।
- अति प्राचीनाया भारतीयज्ञानसम्पदः वैज्ञानिकता सर्वजनोपकारिता महिमा च सगर्वं जगति प्रसारयेत् छात्रः।
- काव्यग्रन्थानाम् सरलान् अंशान् पठित्वा छात्राः तेषाम् अंशानाम् अर्थान् ज्ञास्यन्ति। ते स्वतः मौखिकीं लिखितां च अभिव्यक्तिं कर्तुं शक्ष्यन्ति।
- काव्याध्ययनेन छात्राः महाविद्यालयस्तरे विश्वविद्यालयस्तरे च प्रवर्तमानेषु पाठ्यक्रमेषु अध्ययनार्थम् अवसरं प्राप्तुं समर्थाः भविष्यन्ति।
- काव्येषु रुचिमान् भूत्वा शक्तः संलग्नः भविष्यति।

प्रयोजनम् (विशिष्टम्)

संस्कृतसाहित्ये प्रवेशस्य सामर्थ्यम्

- काव्येषु के विषया अन्तर्भवन्ति इति सामान्यज्ञानं भवेत्।
- कवीनां परिचयं प्राप्नुयात्।
- काव्यानां परिचयं प्राप्नुयात्।
- काव्यालङ्कारच्छन्दसाम् परिचयं प्राप्नुयात्।
- रससिद्धान्तं जानीयात्।
- पठितसामग्रीम् आश्रितानां प्रश्नानाम् उत्तराणि दातुं प्रभवेत्।।

संस्कृतसाहित्याध्ययने सामर्थ्यम्

- काव्यानाम् अध्ययनस्य कश्चित् विशिष्टः क्रमः वर्तते। तज्ज्ञानं प्राप्य काव्यस्य अग्रे अध्ययने समर्थो भवेत्।
- काव्ये विद्यामानां छन्दसाम् अलङ्काराणां व्याकरणांशान् च ज्ञास्यति।
- तेषां ज्ञानेन अन्यत्र विद्यमानानाम् अलङ्कारादीनां ज्ञानं भवेत्।
- कवीनाम् अलङ्कारिकाणां च परिचयं प्राप्नुयात्।

- छन्दः अलङ्कारः रसः इत्यादीन् विषयान् बुद्ध्वा स्वयं काव्यरचनायां सामर्थ्यशाली भवेत्।
- अस्य पाठ्यविषयस्य ज्ञानेन तस्मिन् दर्शने विद्यामानानाम् अन्येषाम् आकरग्रन्थानाम् अध्ययने समर्थो भवेत्।

संस्कृतसाहित्यप्रयोगस्य सामर्थ्यम्

- संस्कृतकाव्यानाम् अध्ययनेन स्वस्य वाचि काव्यात्मकता स्यात्।
- अपरकृतस्य काव्यप्रयोगस्य ज्ञानं भवेत्।
- भावविनिमयः प्रभावितया कर्तुम् प्रभवेत्।
- वाण्या भावविनिमये अलङ्कारादीनाम् शास्त्रसम्मतं प्रयोगं कर्तुं प्रवर्तेत
- वाचि विद्यमानं संयोगवियोगसामर्थ्यम् अवगच्छेत्।
- यथा वैद्यः जनं दृष्ट्वा तस्य रोगादिकं चिन्तयति। चौरः वित्तकोषादिकं चिन्तयति। वणिक् क्रेतारम् पश्यति। तथा जगतः कविरूपेण दर्शने समर्थो भवेत्।

पाठ्यसामग्री

पाठ्यक्रमेण सह निम्नलिखितसामग्री समायोजिता भविष्यति

- द्वे मुद्रिते पुस्तके।
- एकं शिक्षकाङ्कित-मूल्याङ्कनप्रपत्रम् प्रदास्यते। अनेन सह छात्रैः एकं परियोजनाकार्यमपि (Project) करणीयम्।
- काव्यस्य शिक्षणं प्रायोगिकरूपेण अपि भविष्यति। परन्तु प्रायोगिकपरीक्षा कापि नास्ति।
- पाठनिर्माणे संपर्ककक्षासु च अध्यापनकाले छात्रेषु जीवनकौशलानां सम्यक् विकासः भवेत् इति ध्यातव्यम् भविष्यति। अनेन तेषु स्वतः युक्तिसमन्वितचिन्तनशक्तेः विकासः भविष्यति।
- मुक्तविद्यालये प्रवेशोत्तरं पाठ्यक्रममिमं विद्यार्थी एकवर्षतः अधिकाधिकं पञ्चवर्षेषु पूरयितुं शक्नोति।

अङ्कमूल्यायनप्रविधिः परीक्षायोजना च

- पत्रस्य (१००) शतम् अङ्काः सन्ति। परीक्षाकालः होरात्रयात्मकः। अस्य पत्रस्य लिखितस्वरूपमेवास्ति (Theory)। प्रायोगिकरूपं (Practical) किमपि नास्ति। क्रमिकम् (Formative) समुच्चितं (Summative) चेति द्विविधं मूल्यायनं भविष्यति।
- **क्रमिकं मूल्यायनम्** - विंशतेः अङ्कानां (२०) शिक्षकाङ्कितस्य कार्यस्य (TMA) एकं पत्रं स्यात्। अस्य मूलायनम् अध्ययनकेन्द्रे (Study Centre) भवेत्। अस्य कार्यस्य अङ्काः अङ्कपत्रिकायां (Marks sheet) पृथक् उल्लिखिताः स्युः।
- **समुच्चितं मूल्यायनम्** - वर्षे वारद्वयं (मार्चमासि अक्टोबरमासि च) बाह्यपरीक्षा भविष्यति। तत्र परीक्षायां समुच्चितं मूल्यायनं भविष्यति।
- प्रश्नपत्रे ज्ञानम् (Knowledge), अवगमम् (Understanding) अभिव्यक्तिं (Application skill) चावलम्ब्य युक्तानुपातेन प्रश्नाः समाविष्टाः स्युः।
- परीक्षासु अतिलघूत्तरात्मक- लघूत्तरात्मक-निबन्धात्मक-प्रश्नानामपि समावेशः भविष्यति।
- सूत्रार्थः सूत्रव्याख्या रूपसाधनम् इति त्रयो मुख्याः विषयाः स्युः। अन्ये प्रसक्तानुप्रसक्ताः केचिद् विषयाः अपि स्युरिति अवधेयम्।
- उत्तीर्णतायै पणः (condition) - प्रतिशतं त्रयस्त्रिंशद् (३३%) अङ्काः उत्तीर्णतायै पणः (मानदण्डः) वर्तते।
- संस्थानस्य परीक्षायाम् उत्तरलेखनभाषा - संस्कृतम् (अनिवार्यम्)

अध्ययनयोजना

- निर्देशभाषा (Medium of instruction) - संस्कृतम्।
- स्वाध्यायाय कालावधिः (Self-study hours) २४० होराः
- न्यूनतः त्रिंशत् (३०) सम्पर्ककक्षाः (Personal Contact Programme - PCP) अध्ययनकेन्द्रेषु भविष्यन्ति।
- भारांशः - सैद्धान्तिकः (Theory) शतं प्रतिशतम्।
- प्रायोगिकम् (Practical) - नास्ति।

अङ्कविभाजनम्

अग्रे सारण्यां द्रष्टव्यम्

पाठ्यविषयस्य उद्देशः (पाठ्यविषयबिन्दवः)

उच्चतरमाध्यमिककक्षायाः संस्कृतसाहित्यस्य पुस्तके निम्नविषयाः अन्तर्भवन्ति। विवरणमधस्तादुपन्यस्यते।-

समग्रस्य पाठ्यविषयस्य भागाः प्रकल्पिताः सन्ति। प्रतिभागम् कति पाठाः, स्वाध्यायाय कति होराः, सैद्धान्तिकपरीक्षायाम् कियान् अंशः, प्रायोगिकपरीक्षायाम् कियान् अंशः, प्रत्यध्यायम् अङ्कविभाजनं चेति विषयाः अत्र प्रदीयन्ते।

परिच्छेदः - १ कविपरिचयः (पाठाः १-३)

अध्यायस्य औचित्यम्

यैः कविभिः संस्कृतं रम्यं कृतं, काव्यावदानेन पोषितं तेषां देशकालकृति-विषये रसिकानां जिज्ञासा स्वाभाविकी एव। तदेवात्र किञ्चित् उपन्यस्यन्ते।

परिच्छेदः - २ काव्याध्ययनम् - १ (पाठाः ४-११)

अध्यायस्य औचित्यम्

कविकुलगुरुः कालिदासः। तस्य श्रेष्ठा रचना रघुवंशम्। छात्राः कालिदासशैल्या रघुवंशं जानीयुः, तन्माध्यमेन काव्यरसास्वादं कुर्युः इति अत्र रघुवंशस्य प्रथमसंसर्गतः कश्चिदंशः अत्र उपादाय व्याख्यास्यते।

नैके काव्यस्य प्रकाराः। स्तोत्रं जनानां मनांसि रमयति। अतः बोधाय मोदाय च सुप्रसिद्धं स्तोत्रम् मोहमुद्गराख्यमत्र प्रदीयते। अम्बिकादास्य गद्यकाव्यं शिवराजविजयः अति प्रसिद्धम्। तस्य अंशविशेषाः अत्र उपस्थाप्यन्ते।

परिच्छेदः - ३ काव्याध्ययनम् - २ (पाठाः १२-१९)

अध्यायस्य औचित्यम्

उत्तररामचरितं नाम नाटकं भवभूतेः सर्वोत्कृष्टं दानं मन्यन्ते विद्वांसः। अत्र रामायणस्य उत्तरार्धं वर्णितम्। नाटकमिदं सप्ताङ्कात्मकं वर्तते। लङ्कायाः महारणे श्रीरामेण रावणं निहत्य सीता अशोकवनात् उद्धृता। ततः वनवासं समाप्य अयोध्यां प्रत्यागतः। ततः रामस्य राज्याभिषेकः सम्पन्नः। ततः आरभ्य सीतया सह विच्छेदः पुत्रयोः लवकुशयोः जन्म सीतया सह पुनर्मिलनपर्यन्तं नाटकमिदं परिव्याप्तम्। तस्य कश्चिदंशः अत्र उपस्थाप्यते।

बाणभट्टः गद्यकाव्यरचनायां पटुतमः। तस्य किमपि गद्यकाव्यं छात्रैरवश्यपठनीयमिति हेतोः कादम्बर्याः कथाभागस्य एकः अंशः शुकनासोपदेशः अत्र प्रतिपाद्यमानो विषयः। प्रभुत्वलाभे युकवस्य या विपत् सम्भवति तद्विषये शुकनासेन कृतः उपदेशोऽत्र मुख्योस्ति। केनापि युवकेन नूनमयं विषयोऽध्येतव्य इति प्रासङ्गिकता तस्य।

परिच्छेदः - ४ काव्यदर्पणः (पाठाः २०-२७)

अध्यायस्य औचित्यम्

काव्यरचनाया विज्ञानमस्ति। काव्यनिर्माणे ये नियमा अवलम्बनीयाः, काव्याध्ययनेऽपि ये नियमा अवश्यं ज्ञातव्या ते सर्वेऽपि नियमा रीतयः पद्धतयः काव्यशास्त्रे आलोच्यन्ते। तेषु केचिद् प्राथमिकतया ज्ञातव्या विषया अस्मिन् विभागे अन्तर्भवन्ति। अलंकारशास्त्रमपि तत् कथ्यते। अत्र अलंकारिकाणां परिचयोऽपि दीयते। अलंकारः वृत्तिः छन्दः रस इत्येते मुख्या विषया अत्र चिताः सन्ति।

पाठ्यविषयस्य उद्देशः (पाठ्यविषयबिन्दवः)

उच्चतरमाध्यमिककक्षायाः संस्कृतसाहित्यस्य पुस्तके निम्नविषयाः अन्तर्भवन्ति -

क्र.सं.		मुख्यबिन्दवः	स्वाध्यायाय होराः	भारांशः (अङ्काः)
१	प्रथमः परिच्छेदः	**कविपरिचयः-**	२४	८
	पाठः - १	कवीनां देशकालकृतिपरिचयः- वाल्मीकिः व्यासः भासः		
	पाठः - २	कवीनां देशकालकृतिपरिचयः- कालिदासः भारविः अश्वघोषः		
	पाठः - ३	कवीनां देशकालकृतिपरिचयः- श्रीहर्षः क्षेमेन्द्रः भवभूतिः कल्हणः शिवस्वामी		
२	द्वितीयः परिच्छेदः	**काव्याध्ययनम् - १-**	६०	३०
	पाठः - ४	रघुवंशम् (प्रथमसर्गः)- रघुवंशीयनृपाणां गुणवर्णनम् (१-१० श्लोकाः)		
	पाठः - ५	रघुवंशम् (प्रथमसर्गः)- राज्ञो दिलीपस्य गुणवर्णनम् - १ (११-२३ श्लोकाः)		
	पाठः - ६	रघुवंशम् (प्रथमसर्गः)- राज्ञो दिलीपस्य गुणवर्णनम् - २ (२४-३४ श्लोकाः)		
	पाठः - ७	रघुवंशम् (प्रथमसर्गः)- वशिष्ठाश्रमं प्रति गमनम् (३५-४८ श्लोकाः)		
		स्तोत्रादिसाहित्यम्-		
	पाठः - ८	स्तोत्रसाहित्यम् - - मोहमुद्गरः - अन्वयः व्याख्या, सरलार्थः, व्याकरणम्		
	पाठः - ९	ऐतिहासिकम् अर्वाचीनं काव्यम्- - शिवराजविजयः - बटुसंवादः		
	पाठः - १०	ऐतिहासिकम् अर्वाचीनं काव्यम्- - शिवराजविजयः - योगीराजसंवादः		
	पाठः - ११	ऐतिहासिकम् अर्वाचीनं काव्यम्- - शिवराजविजयः - यवनदुराचारः		

३	**तृतीयः परिच्छेदः**	**काव्याध्ययनम् - २-**	७०	३०
	पाठः - १२	उत्तररामचरितम् (प्रथमोङ्कः)- श्लोकस्य अन्वयः, अन्वयार्थः, गद्यवाक्यानां सरलार्थः, प्रयोजने सति व्याकरणटिप्पणी विशेषटिप्पणी च		
	पाठः - १३	उत्तररामचरितम् (प्रथमोङ्कः)- अष्टावक्रसंवादः		
	पाठः - १४	उत्तररामचरितम् (प्रथमोङ्कः)- चित्रदर्शनम् - १		
	पाठः - १५	उत्तररामचरितम् (प्रथमोङ्कः)- चित्रदर्शनम् - २		
	पाठः - १६	कादम्बरी - शुकनासोपदेशः- यौवनस्वभावः - गद्यवाक्यानाम् अन्वयार्थः, सरलार्थः, व्याकरणटिप्पणी विशेषटिप्पणी च		
	पाठः - १७	कादम्बरी - शुकनासोपदेशः लक्ष्माचापल्यम्-		
	पाठः - १८	कादम्बरी - शुकनासोपदेशःलक्ष्मीदुष्प्रभावः-१-		
	पाठः - १९	कादम्बरी - शुकनासोपदेशःलक्ष्मीदुष्प्रभावः-२-		
४	**चतुर्थः परिच्छेदः**	**काव्यदर्पणः-**	८६	३४
	पाठः - २०	अलंकारिकपरम्परापरिचयः- भरतः भामहः, दण्डी, वामनः, रुद्रटः, अभिनवगुप्तः , कुन्तकः - तेषां दशकालकृतयः		
	पाठः - २१	अलंकारिकपरम्परापरिचयः- आनन्दवर्धनः, अप्पय्यदीक्षितः, मम्मटः, भोजराजः, विश्वनाथः, जगन्नाथः - तेषां दशकालकृतयः		
	पाठः - २२	वाच्य-लक्ष्य-व्यङ्ग्यानां सामान्यपरिचयः		
	पाठः - २३	छन्दांसि- छन्दसां मात्रागणयतीनां परिचयः। छन्दोभेदाः।		
	पाठः - २४	छन्दांसि- मात्रिकच्छन्दांसि, वार्णिकच्छन्दांसि च चितानि। - अनुष्टुभ् इद्रवज्रा वसन्ततिलका मालिनी शार्दूलविक्रीडितम् इत्यादीनां केषांचित् छन्दसां लक्षणम्, लक्षणस्य व्याख्या, उदाहरणश्लोके समन्वयः		
	पाठः - २५	आलंकारपरियचः- अर्थालंकारः, शब्दालंकारः - सामान्यपरिचयः, अलंकारस्य प्रयोजनम्, लक्षणम्, लक्षणस्य बोधनम्, दृष्टान्तपुरःसरम् अन्वयः। केचित् मुख्यालंकाराः।		
	पाठः - २६	आलंकारपरियचः- उपमा, रूपकम्, दृष्टान्तः, उत्प्रेक्षा इत्यादयः केचित् मुख्यालंकाराः		
	पाठः - २७	रसपरिचयः- विभावादीनां परिचयः, सरस्वरूपपुरःसरं रसास्वादप्रकारः, रसभेदाः		

प्रश्नपत्रस्य प्रारूपम् (Question Paper Format)

विषयः - संस्कृतसाहित्यम् (३४८) (Sanskrit Sahitya) स्तरः- उच्चतरमाध्यमिककक्षा

परीक्षाकालावधिः (Time)- होरात्रयम् (३ hrs) पूर्णाङ्काः (Full Marks)- १००

लक्ष्यानुसारि अङ्कविभाजनम्

विषयाः	अङ्काः	प्रतिशतं योगः
ज्ञानम् (Knowledge)	२५	२५%
अवबोधः (Understanding)	४५	४५%
अनुप्रयोगकौशलम् (Application Skill)	३०	३०%
महायोगः->	**१००**	

प्रश्नप्रकारेण अङ्कभारविभाजनम्

प्रश्नप्रकारः	प्रश्नसंख्या	अङ्काः	योगः
दीर्घोत्तरीयप्रश्नाः (LA)	५	६	३०
लघूत्तरात्मकप्रश्नाः (SA)	१०	४	४०
सुलघूत्तरीयप्रश्नाः (VSA)	१०	२	२०
बहुविकल्पीयप्रश्नाः एकाङ्कप्रश्नाः स्तम्भमेलनं रिक्तस्थानपूर्तिः च	१०	१	१०
महायोगः->	**३५**		**१००**

पाठ्यविषयविभागानुसारि भारांशः

विषयघटकाः	अङ्काः	स्वाध्यायाय होराः
१. कविपरिचयः	८	२४
२. काव्याध्ययनम् - १	२८	६०
३. काव्याध्ययनम् - २	३०	७०
४. काव्यदर्पणः	३४	८६
महायोगः ->	**१००**	**२४०**

प्रश्नपत्रस्य काठिन्यस्तरः

प्रश्नस्तरः	अङ्काः
कठिनः (Difficult) (मेधावी एव उत्तरदाने समर्थः)	२५
मध्यमः (Medium) (नित्यं पठन् अध्यवसायी छात्रः उत्तरदाने समर्थः)	५०
सरलः (Easy) (समग्रां पाठसामग्रीम् अल्पशः पठन् छात्रः उत्तरदाने समर्थः)	२५

प्रश्नपत्रप्रतिमा

अस्मिन् प्रश्नपत्रे ... प्रश्नाः सन्ति। .... मुद्रितपुटानि च सन्ति।

Roll No. अनुक्रमाङ्कः	४	५	०	१	५	९	१	८	३	०	०	१	Code No. गूढसंख्या	५५/SS/A/S

SET स्तबकः **A**

संस्कृतसाहित्यम्

Sanskrit Sahitya

(३४८)

Day and Date of Examination
परीक्षादिनं दिनाङ्कश्च ..... ______________________

Signature of two Invigilators
निरीक्षकयोः हस्ताक्षरम्
१) ______________________
२) ______________________

सामान्या निर्देशाः

१) अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

२) निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।

३) वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।

४) समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।

५) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।

६) स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूंन लेख्या।

७) समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

संस्कृतसाहित्यम् (Sanskrit Sahitya)

(३४८)

परीक्षासमयावधिः (Time) होरात्रयम् (३ Hrs) **पूर्णाङ्काः (Full Marks) - १००**

निर्देशाः -

१) अस्मिन् प्रश्नपत्रे [A] भागे १०, [B] भागे १०, [C] भागे १०, [D] ५ इति आहत्य ३५ प्रश्नाः सन्ति।

२) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काःx प्रश्नाः=पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

३) समे प्रश्ना अनिवार्याः।

[A] दशानां युक्तं विकल्पं चिनुत। १ x १०=१०

१) मायणे कति काण्डानि सन्ति।

(क) सप्त (ख) अष्टौ (ग) नव (घ) दश।

२) द्वादशपञ्जरिकास्तोत्रानुसारं मरणे सन्निहिते कः रक्षति।

(क) गोविन्दः (ख) शिवः (ग) ब्रह्मा (घ) कार्तिकः

३) अरुण एष प्रकाशः इति कस्मिन् काव्ये अस्ति।

(क) शिवराजविजयः (ख) किरातार्जुनीयम् (ग) मेघदूतम् (घ) अभिज्ञानशाकुन्तलम्

४) दाक्षिणात्यकेशरी कः।

(क) शिवराजः (ख) गौरसिंहः (ग) अफजलखानः (घ) श्यामवटुः

५) लक्ष्मीः कं दुःस्वप्नमिव न स्मरति।

(क) दातारम् (ख) सूजनम् (ग) शूरम् (घ) सरस्वतीपरिगृहीतम्

६) लौकिकं छन्दः कतिविधम् अस्ति।

(क) द्विविधम् (ख) त्रिविधम् (ग) चतुर्विधम् (घ) पञ्चविधम्।

७) स च नित्यं प्रशान्तात्मा इत्यादिश्लोकः कस्मिन् स्तोत्रे अस्ति।

(क) द्वादशपञ्जरिका (ख) श्रीरामगुणवर्णना (ग) शिवताण्डवस्तोत्रम् (घ) अच्युताष्टकम्

८) वृत्तं कतिविधं वर्तते।

(क) द्विविधम् (ख) त्रिविधम् (ग) चतुर्विधम् (घ) पञ्चविधम्।

९) भासस्य का कृतिः वर्तते।

(क) रामायणम् (ख) महाभारतम् (ग) स्वप्नवासवदत्तम् (घ) उत्तररामचरितम्।

१०) रामलक्ष्मणयोः जटाबन्धं कुत्र जातम्।

(क) अयोध्यायाम् (ख) किष्किन्धायाम् (ग) जनस्थाननामकारण्ये (घ) शृङ्वेरपुरे

[B] दशानां यथानिर्देशम् उत्तराणि लिखत। २ x १०=२०

१) अलङ्कारशब्दस्य करणपक्षे व्युत्पत्तिः का। अलङ्कारशब्दस्य भावपक्षे व्युत्पत्तिः का। १+१=२

२) कादम्बरीं कः रचितवान्। कादम्बरी कथा उत आख्यायिका। १+१=२

३) भामहः कं ग्रन्थं लिखितवान्। कस्य सम्प्रदायस्य प्रवर्त्तकः अस्ति। १+१=२

४) वामनः कुत्रत्यः। वामनस्य कालः कः। १+१=२

५) अलङ्कारः कतिविधः भवति। ते च के। १+१=२

६) भरतः कं ग्रन्थं लिखितवान्। कस्य सम्प्रदायस्य प्रवर्त्तकः अस्ति। १+१=२

७) अलङ्कारसम्प्रदायस्य प्रवर्त्तकः कः। तस्य मते काव्यस्य आत्मा कः। १+१=२

८) सन्निहिते मरणे किन्न रक्षति। केन चित्तं विनोदनीयम्। १+१=२

९) सूर्यः किम् समुद्भूय कस्मै निवेदयितुं च अस्तं गतः। १+१=२

१०) अलङ्कारः काव्यस्य स्थिरधर्मः अस्ति न वा। अलङ्कारः काव्यस्य किं वर्धयति। १+१=२

[C] दश अनतिदीर्घोत्तरैः समाधत्त। ४ x १०=४०

१) किं महत् अवधानम्। जीवनं कीदृशम् इति साकल्येन वर्णयत।

२) श्रीरामस्य गुणान् स्वभाषया प्रकटय्य तस्य राज्यकौशलं वर्णयत।

३) महमदस्य अधमताम् वर्णयित्वा दक्षिणदेशं वर्णयत।

४) रामः कथं लोकनिन्दां कृतवान् अथवा प्रस्रवणगिरेः यथाग्रन्थं वर्णनं कुरुत।

५) धनातिशयः कुतो न शोभते। अथवा मुनयः विन्ध्यारण्ये जीवनं कथं यापयन्ति स्म।

६) अलसलुलित... इति प्रतीकोद्धृतं श्लोकम् सम्पूर्णम् उद्धृत्य व्याख्यात। अथवा सीताया आजीवनपवित्रताविषये श्रीरामेण किमुक्तम्।

७) श्रियो दुश्चरितं वर्ण्यताम्। अथवा कुतः अयं गुरूपदेशः अनन्यः।

८) समवृत्तम् अथवा विषमवृत्तम् अवलम्ब्य एकं लघुप्रबन्धं लिखत।

९) मात्रिकच्छन्दः अथवा वार्णिकच्छन्दः अवलम्ब्य लघुप्रबन्धं लिखत।

१०) वंशस्थतोटकयोः एकस्य च्छन्दसः लक्षणम् उक्त्वा उदाहरणे लक्षणसमन्वयः कार्यः।

[D] पञ्च दीर्घोत्तरैः समाधेयाः। ६ x ५=३०

१) शिववीरगौरसिंहयोः आलापं वर्णयत। तौ महान्तौ धर्मस्य कृते किं किं कष्टं सहेते स्म। अथवा श्रीरामस्य गुणान् वर्णयित्वा राज्यचालनकौशलं वर्णयत।

२) आज्ञा गुरूणां ह्यविचारणीया इति सूक्तिं समर्थयत। अथवा भवभूतिं परिचाययत।

३) सीतया कृतं रामवर्णनं यथामति उपस्थापयत। अथवा उत्तररमाचरितस्य मङ्गलश्लोकं व्याख्यात।

४) उपमाम् अथवा अतिशयोक्तिम् अलङ्कारं वर्णयत।

५) रूपकम् अथवा समासोक्तिम् अलङ्कारं वर्णयत।

--)(O)(--

प्रश्नपत्रप्रतिमाया उत्तरमाला

[A] दशानां युक्तः विकल्पः। १ x १०=१०

१-(क), २-(क), ३-(क), ४-(क), ५-(क), ६-(क), ७-(ख), ८-(ख), ९-(ग), १०-(घ)

[B] दशानां यथानिर्देशम् उत्तराणि। २ x १०=२०

१) अलङ्क्रियते अनेन इति अलङ्कारः इति करणपक्षे व्युत्पत्तिः। अलङ्कृतिः अलङ्कारः इति भावपक्षे व्युत्पत्तिः।१+१=२

२) कादम्बरीं बाणभट्टः रचितवान्। कादम्बरी कथा अस्ति। १+१=२

३) काव्यालङ्कारः, अलङ्कारसम्प्रदायस्य। १+१=२

४) काश्मीरीयः, अष्टमशतकोत्पन्नः। १+१=२

५) त्रिविधः। शब्दालङ्कारः, अर्थालङ्कारः, शब्दार्थालङ्कारः। १+१=२

६) नाट्यशास्त्रम्, रससम्प्रदायस्य। १+१=२

७) भामहः। अलङ्कारः। १+१=२

८) सन्निहिते मरणे डुकृञ् करणे इत्यादिव्याकरणशास्त्रादिकं न रक्षति।
स्वकर्मणा उपार्जितेन धनेन चित्तं विनोदनीयम्। १+१=२

९) सूर्यः पूर्वदिशं समुद्भूय विष्णवे निवेदयितुं च अस्तं गतः। १+१=२

१०) स्थिरधर्मः न भवति। शोभाम् वर्धयति। १+१=२

[C] दश अनतिदीर्घोत्तरैः समाधत्त। ४ x १०=४०

१) पाठः- ८ द्रष्टव्यः

२) पाठः- ८ द्रष्टव्यः

३) पाठः- ९ द्रष्टव्यः

४) पाठः- ११ / १२ द्रष्टव्यः

५) पाठः- १३ / १२ द्रष्टव्यः

६) पाठः- १२ / १० द्रष्टव्यः

७) पाठः- १४ / १३ द्रष्टव्यः

८) पाठः- २२.४.१ / २२.४.३ द्रष्टव्यः

९) पाठः- २३.१ / २२ द्रष्टव्यः

१०) बिन्दुः- २३.२.५ / २३.२.६ द्रष्टव्यः

[D] पञ्च दीर्घोत्तरैः समाधेयाः। ६ x ५=३०

१) पाठः- ९ / ८ द्रष्टव्यः

२) पाठः- १३ / १० द्रष्टव्यः

३) पाठः- ११ / १० द्रष्टव्यः

४) बिन्दुः- २५.२ / २५.९ द्रष्टव्यः

५) बिन्दुः- २५.४ / २५.८ द्रष्टव्यः

--)(O)(--